# Shri Ganesha Stuti Dambhasurakrita

# દમ્ભાસુરકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Dambhasurakrita

File name : gaNeshastutiHdambhAsurakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 45 | 1.45 9-23||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

Shri Ganesha Stuti Dambhasurakrita

# દમ્ભાસુરકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દમ્ભાસુર ઉવાચ ।
નમસ્તે બ્રહ્મરૂપાય બ્રહ્માકારશરીરિણે ।
બ્રહ્મણે બ્રહ્મદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૯॥
નમસ્તે ત્રિદશેશાય દૈત્યદાનવપાય ચ ।
સર્વત્ર યોગરૂપાય ભાવહીનાય તે નમઃ ॥ ૧૦॥
સિદ્ધિબુદ્ધિપતે તુભ્યં નમઃ સિંહધ્વજાય ચ ।
ગણાનાં પતયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૧॥
એકદન્તાય દેવાય હ્યનન્તવિભવાય તે ।
વિઘ્નેશાય મહાવિઘ્નનાશનાય નમો નમઃ ॥ ૧૨॥
અપારગુણધારાય દૈત્યદાનવમર્દિને ।
મનોવાણીમયાયૈવ સર્વરૂપાય તે નમઃ ॥ ૧૩॥
મનોવાણીવિહીનાય યોગિભ્યો યોગદાયિને ।
યોગાય યોગનાથાય વિશ્વપાય નમો નમઃ ॥ ૧૪॥
માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ।
માયાહીનાય સર્વત્ર સમભાવધરાય તે ॥ ૧૫॥
અવ્યક્તાય નમસ્તુભ્યં વ્યક્તિમૂલધરાય ચ ।
નિર્મોહાય સમોહાય લમ્બોદર નમો નમઃ ॥ ૧૬॥
યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગા મહર્ષયઃ ।
યોગીન્દ્રા બ્રહ્મવિષ્ણ્વાદ્યાસ્તં કિં સ્તૌમિ પરાત્ પરમ્ ॥ ૧૭॥
ઇત્યુક્ત્વા પતિતઃ પૃથ્વ્યાં દમ્ભો ભક્તિસમન્વિતઃ ।
તમુત્થાપ્ય ગણાધીશ ઊચિવાન્ ભક્તિભાવિતઃ ॥ ૧૮॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
ત્વયા દમ્ભ કૃતં સ્તોત્રં મમ સન્તોષવર્ધનમ્ ।

યઃ પઠેત્ પાઠયેત્તદ્વા સ સર્વં સુખમાપ્નુયાત્ ॥ ૧૯॥
પુત્રપૌત્રકલત્રાદિ ધનધાન્યપ્રદં ભવેત્ ।
આધિવ્યાધિહરં ચૈવ સર્વોપદ્રવનાશનમ્ ॥ ૨૦॥
એકકાલં દ્વિકાલં વા ત્રિકાલં સતતં તથા ।
યઃ પઠેત્ સ નરોઽત્યન્તં મમ પ્રીતિકરો ભવેત્ ॥ ૨૧॥
ત્વાં હન્તું ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।
અધુના શરણં યાતસ્તતો હન્મિ ન નિશ્ચિતમ્ ॥ ૨૨॥
વરં વરય મત્તસ્ત્વં યત્ત્વચ્ચિત્તે સ્થિતં પરમ્ ।
સ્તોત્રેણ ભક્તિભાવેન સન્તુષ્ટોઽહં દદામિ તે ॥ ૨૩॥

ઇતિ દમ્ભાસુરકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૪૫ । ૧.૪૫ ૯-૨૩॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 45 . 1.45 9-23..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Dambhasurakrita*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*